दिनाङ्क :- 22.05.2026

प्रात: - 06:55

प्रधानमन्त्री-सायप्रस्-राष्ट्रपति

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहल्यां सायप्रस्-देशस्य राष्ट्रपतिना निकोस् क्रिस्टोडौलिड्स् इत्यनेन सह वार्तालापं करिष्यति। श्रीक्रिस्टोडौलिड्स् इत्येषः ह्यः नवदेहलीं प्राप्तवान्। विमानस्थानके केन्द्रीय-मार्ग-परिवहन-राजमार्ग-राज्यमन्त्री अजय टम्टा इत्यनेन तस्य स्वागतम् कृतम्। सः मुम्बई-नगरं अपि गतवान्। प्रधानमन्त्री मोदी सायप्रस्-देशस्य राष्ट्रपतिः च परस्पर-हितस्य विभिन्नेषु क्षेत्रेषु द्वैपाक्षिकसहकरणं सुदृढं कर्तुं चर्चां करिष्यतः। वार्तायाः अनन्तरं अनेकेषु सन्धिपत्रेषु हस्ताक्षराणि विनिमयञ्च भविष्यति। श्रीमोदी अतिथिविशेषस्य सम्मानार्थं भोजस्य आयोजनं करिष्यति। सायप्रस-देशस्य राष्ट्रपतिः अद्य सायङ्काले राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सहापि मिलिष्यति।

गोयल-प्रधानमन्त्री भ्रमणम्

केन्द्रीय-वाणिज्य-उद्योगः मन्त्री पीयूषगोयलः अद्य अवदत् यत् विश्वं भारतं देशं विश्वसनीयसहभागीरूपेण पश्यतीति। प्रधानमन्त्री-नरेन्द्र-मोदी-वर्यस्य पञ्चराष्ट्राणां यात्रायाः विषये नवदेहल्यां वार्ताहरान् सम्बोधयन् श्रीगोयलः अवदत् यत् इयं यात्रा समाजस्य प्रत्येकवर्गाय लाभस्य प्रत्याभूतिं करोतीति। सः अवदत् यत् प्रधानमन्त्रिमण्डलस्य भ्रमणेन प्रतीयते यत् भारतं वैश्विकस्तरे दृढतया स्थितम् अस्तीति। सः एकस्य प्रश्नस्योत्तरे अवदत् यत् राहुलगान्धिनः नकारात्मकराजनीतेः कारणात् जनाः निर्वाचने काङ्ग्रेसेति दलम् निराकृतवन्तः। पश्चात् अन्यस्मिन् कार्यक्रमे श्रीगोयलः अवदत् यत् भारतम् अमेरिकाञ्च स्वाभाविकसहभागीरूपेण कार्यं कुर्वन्तौ स्तः, प्रौद्योगिकी, नवान्वेषणम्, रक्षा, डिजिटल-दत्तांशकेन्द्राणि, क्वाण्टम्-कम्प्यूटिङ्ग् अथ चिकित्सोपकरणादिषु क्षेत्रेषु परस्परं पूरकरूपेण कार्यं कुरुतश्चेति।

भारत-फ्रांस-सङ्गमः

अष्टमः भारत-फ़्रान्स्-समुद्रीय-सहकार-संवादः बुधवासरे पैरिस-नगरे आयोजितः। चर्चायां अवैध-समुद्रीय-गतिविधीनां प्रतिरोधाय परिचालन-सहकारं सुदृढं कर्तुं उभयोः देशयोः सहभागित्व-प्रतिबद्धतां प्रति अवधानं दत्तम्। सशस्त्र-लुण्ठनं, सागरीय-आतङ्कवादः, मादकद्रव्याणां क्रयविक्रयणं, अवैधं, अनिर्दिष्टं अथ अनियन्त्रितमत्स्यपालनम्, अपि च अन्यानि सागकरीय-सङ्कटानि चापि चर्चिताः।

पश्चिबङ्ग-आर. जी. कर् प्रकरणम्

कलकत्ता-उच्चन्यायालयेन आर. जी. कर-चिकित्सा-महाविद्यालये बलात्कार-हत्या-प्रकरणस्य अन्वेषणार्थं विशेष-अन्वेषण-दलस्य स्थापना कृता अस्ति। त्रिसदस्यीयस्य एस. आई. टी. इत्यस्य नेतृत्वं केन्द्रीय-अन्वेषण-विभागस्य पूर्वक्षेत्रस्य संयुक्तनिदेशकः भविष्यति। न्यायालयः जून्-मासस्य पञ्चविंशतिः दिनाङ्कात् पूर्वं स्वप्रतिवेदनं दातुं दलं आदिष्टवान्। न्यायालयस्य निर्णयः पीडित-परिवारस्य पुनः पुनः चिन्तायाः अनन्तरम् अस्ति।

एन. ई. ई. टी. प्रकरणे निगडनम्

एन्. ई. ई. टी. परीक्षा-पत्र-स्राव-प्रकरणस्य प्रमुखविकासे लातूर्-नगरस्य बालरोगचिकित्सकः डा. मनोजशिरुरे इत्येषः केन्द्रीय-अन्वेषण-विभागेन गृहीतः इति कथ्यते। सूत्रानुगुणं, डा. शिरुरे इत्येषः स्वपुत्र्यै एन्. ई. ई. टी. परीक्षायाः प्रश्नपत्रं अक्रीणोदिति अन्वेषणसंस्थाः शङ्कयन्ति। कतिपयेभ्यः दिनेभ्यः पूर्वं सी. बी. आई. इत्यस्य अधिकारिणः लातूर्-नगरस्य तस्य चिकित्सालयं गत्वा विस्तृतान्वेषणं कृतवन्तः।

पुलवामा-आततायिप्रशिक्षकः मारितः

चत्वारिंशतोऽधिकानां सी. आर्. पी. एफ्. इत्यस्य वीरभटानां प्राणहन्ता, एकोनविंशत्युत्तरद्विसहस्र- तमवर्षस्य पुल्वामा-आतङ्कवाद-आक्रमणस्य सूत्रधारत्वेन विश्वसितः हम्ज़ा बुर्हान नामकः पाकिस्तान-अधिकृत-काश्मीरे अज्ञात-भुशुण्डिधारीभिः नरकं प्रति प्रयापितः।

ऋतुविज्ञानविभागः

भारतीय-ऋतु-विज्ञान-विभागेन श्वः उत्तरप्रदेशे, मध्यप्रदेशे, विदर्भ-प्रदेशे च उष्णतरङ्गात् तीव्रतर-उष्णतरङ्गस्य स्थितिः भविष्यतीति मत्वा रक्त-सूचना घोषिता। दिल्ली, हरियाणा, चण्डीगढ, तटीय-आन्ध्रप्रदेशे अपि एतादृशी स्थितिः भवितुम् अर्हति।

आई. पी. एल. क्रिकेटः

आई. पी. एल. क्रिकेट्-क्रीडाचक्रे गुजरात-टैटन्स इति दलेन गतरात्रौ अहमदाबाद्-नगरस्य नरेन्द्र-मोदी-क्रीडाङ्गणे चेन्नै-सूपर्-किङ्ग्स्-दलम् एकोननवतिः धावनाङ्कैः पराजितम्। गुजरात् टाईटन्स् इत्यनेन स्थापितस्य त्रिंशदधिकदद्विशतधावनाङ्कानां लक्ष्यस्य अनुसरणं कुर्वत्, चेन्नै सूपर् किङ्ग्स् इति दलम् प्रायः मध्यचतुर्दशकन्दुकक्षेपणचक्रेषु चत्वारिंशदधिकैकशतं धावनाङ्कान्येव विरचयत्। अद्य सायं 7.30 वादने हैदराबाद्-नगरे रायल् चालॅञ्जर्स् बेङ्गलूरु-विरुध्य सन् रैसर्स् हैदराबाद् दलं क्रीडिष्यति।

।। इति वार्ता:।।